# न्यायवर्त्मानुसारिव्याख्यानां करणविमृष्टौ प्रभावः

**श्रीजीव-गोस्वामी**

**प्रबन्धसारः**

*कार्यमात्रस्य सन्ति नैकानि कारणानि। तेषु कारणेषु एकतमस्य कारणान्तरापेक्षया असाधारणत्वात्करणाभिधानं भवति। किन्तु तस्य करणस्य असाधारणत्वस्य स्वरूपनिर्णये मतवैभिन्न्यात् तत् करणमपि स्वरूपान्तरतां याति। अत्रेदं वाच्यम्, यदिदं प्रसिद्धं "**फलायोगव्यवच्छिन्नं कारणं करणमि**"ति प्राचां वाचा, "**व्यापारवत् कारणं करणमि**"ति च नवानां वाणीति तत्रोच्यते न हि सर्वेषामेव प्रत्नानां नयोऽयं "**फलायोगव्यवच्छिन्नं कारणं करणमि**"ति, परं केषाञ्चनैव। व्यत्ययञ्च उद्द्योतकरेणोक्तं वार्तिकस्थमिदं वच एव साधयति – "**इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणम्**" (न्यायवार्तिकम्) इति। अतस्तेनात्र इन्द्रियस्य प्रमाणत्वाङ्गीकारात् सन्निकर्षरूपव्यापारविशिष्टं करणमेव तदभिप्रेतमित्यनुमानं लघुक्लेशम्। वस्तुतो यत् प्रसिद्धं तस्य पूर्णतो विपरीतम् ईरितं तर्कसङ्ग्रहस्य नीलकण्ठीटीकायाम् "असाधारणं कारणं करणम्" इति।*

*"**व्यापारवत् कारणं करणमि**"त्यस्य व्यापारविशिष्टकारणस्य करणत्वमित्यर्थत्वे घटप्रत्यक्षे घटस्यापि करणता, तत्र घटचक्षुस्संयोगस्य व्यापरत्वात्, तस्य च उभयनिष्ठत्वात्। एवं घटस्य तादृशसंयोगवत्त्वाद् घटेनापि करणेन भाव्यमिति चेन्न, व्यापारसम्बन्धावच्छिन्नकारणताश्रयमेव करणत्वेनात्र विवक्षितम्, तादृशकारणताश्रयं च चक्षुरिन्द्रियमेव भवति, घटस्तु विषयतासम्बन्धावच्छिन्नकारणताश्रयो भवतीति न स करणम्। ननु कोऽत्र व्याख्यानप्रभावः? प्रज्ञावतः सुबोधम् एतत्। कथम् अन्यथा व्याख्यात्रा अवगम्य व्यलेखि, न च मन्दमतीनां गतिरचनाय इति वाच्यम्, यतो **यस्य नास्ति स्वयंप्रज्ञा शास्त्रं तस्य करोति किम्** इति चेदुच्यते, सत्यम्, गम्यं हि तत् मेधाविना, न तु कोमलधिया, न च कश्चन आ जन्मनः कृतविद्यः। पर-नय-पराकरण-पराणां विपक्षीयाणां कर्कश-विचार-करवालैर्यथा न मुकुलमतीनां वादगतिः खण्डिता भवति, यथा च विद्यार्थिबुद्धिः निपुणसरणिर्भवति तद् उद्दिश्यैव ईदृशं सूक्ष्मं विश्लेषणम्।*

*व्यापारवतो व्यापारस्यैव वा करणत्वम् आधिक्येन स्वीकृतम्। तत्र च, यैस्तु फलायोगव्यवच्छिन्नस्य करणत्वमङ्गीकृतं तैरपि व्यापारवाचकपदादुत्तरं तु न तृतीया प्रयुज्यते, किन्तु तद्-व्यापारवद्-वाचकपदादुत्तरम् एव, अत एतद् वक्तुं शक्यते यत् तेषां नये व्यापार एव मुख्यं करणम्, व्यापारवत् च गौणं करणम्, तत्र व्यापारवति धर्मिणि धर्मारोपात् करणत्वमारोप्यते, तद्वाचकात् च पदाद् अतः तृतीया तस्यापि गौणतया करणत्वात्। व्यापारवतः करणत्ववादिनां नये तु एतद्-दृष्ट्या लाघवम्। एतच्च व्याख्यासु करणवाचक-पद-प्रयोगदर्शनत एव भवति सुगमम्।*

## उपोद्घातः

"यमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्" इति न्यायसूत्रानुसारं मोक्षो हि निखिलास्तिक-दर्शनशास्त्रप्रयोजनम्। परमसति शास्त्रार्थबोधे कथं तत्साध्यसाधनम् इत्यतः शास्त्रार्थ-बोधकव्याख्यानामपि प्रयोजनसाधकत्वं भवति। किन्तु शास्त्रगतमेकैकपदमपि भवति बह्वर्थबोधकम्, अतस्तादृशगम्भीरार्थबोधक-पदबहुलशास्त्रव्याख्यानामपि भूयस्त्वम्। इह तु शास्त्रविशेषस्य न्यायस्य विषयविशेषं करणरूपमधिकृत्य विचारलवः प्रस्तुतः।

## प्रयोजनम्

व्याख्यानपदेन हि भाष्यटीकावार्त्तिक-वृत्तिविवृत्यादीनां समेषां भवति ग्रहणम्, तेषां च तात्पर्यबोधकत्वं भवति समानो धर्मः, तद्धर्मसामान्याच्च समेषां व्याख्यानत्वम्। किन्तु तात्पर्यबोधकत्वमिति खलु तात्पर्यस्य निश्चयात्मकज्ञानोत्पादकत्वम्? तच्च व्याख्यानानां क्वचिद् एव तिष्ठति, बहुत्र संशयात्मकं जायते ज्ञानमिति संशयात्मकज्ञानोत्पादकत्वात् कथं तत्र तत्र तेषां व्याख्यानत्वमिति चेन्न, संशयस्य विचाराङ्गतया विचारस्य च निश्चयजनकत्वात् तेषामपि परम्परया निश्चयात्मकज्ञानोत्पाद-कत्वमिति सर्वं भद्रम्।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

ननु विवक्षितार्थबोधः खलु अपेक्षितः, सति च तस्मिन् व्याख्यानान्यपि अपार्थानि इत्यपि न, पामरमतिषु कदाचिद् यथार्थोऽपि शास्त्रार्थः अयथार्थ इव भाति, अपि च कस्यचित् प्रतिपादितार्थस्य अप्रमापि प्रमा इव प्रतीयते इति तादृशस्थलेषु शिष्यबुद्धिवैशारद्यलक्ष्यक एव व्याख्यातॄणां प्रयास इति बोध्यम्। यथोक्तम् उदयनाचार्येण किरणावल्याम् –

"अतिविरसमसारं मानवार्त्ताविहीनं
प्रविततबहुवेलप्रक्रियाजालदुःस्थम्।
उदधिसममतन्त्रं तन्त्रमेतद्वदन्ति
प्रखलजडधियो ये तेऽनुकम्प्यन्त एते॥"[1]

करणस्वरूपस्य तु निर्णये कृतेऽपि नैकदर्शनेषु अत्र तु न्यायमते कथं तत्स्वरूपं प्रत्यपादि न्यायमतानुसारिव्याख्यासु च कथं तत्स्वरूपप्रकटने विहितः प्रयास इत्येव आलोचयिष्यते। वस्तुतस्तु यद्यपि ग्रन्थकारैः टीकाकृद्भिरेव च तेषां कृतिषु करणस्वरूपं विचारितचरम्, तथापि तत्र तत्र विचारणायां कस्तेषां विशेषः स एवात्र मदीयप्रबन्धविषयः।

**विमर्शः**

कार्यमात्रस्य सन्ति नैकानि कारणानि। तेषु कारणेषु एकतमस्य कारणान्तरापेक्षया असाधारणत्वात्करणाभिधानं भवति। किन्तु तस्य करणस्य असाधारणत्वस्य स्वरूपनिर्णये मतवैभिन्न्यात् तत् करणमपि स्वरूपान्तरतां याति। अत्रेदं वाच्यम्, यदिदं प्रसिद्धं "फलायोगव्यवच्छिन्नं कारणं करणमि"ति प्राचां वाचा, "व्यापारवत् कारणं करणमि"ति च नवानां वाणीति तत्रोच्यते न हि सर्वेषामेव प्रत्नानां नयोऽयं "फलायोगव्यवच्छिन्नं कारणं करणमि"ति, परं केषाञ्चनैव। व्यत्ययञ्च उद्द्योतकरेणोक्तं वार्त्तिकस्थमिदं वच एव साधयति – "इन्द्रियं खलु अर्थप्रकाशकत्वात् प्रमाणम्"[2] इति। अतस्तेनात्र इन्द्रियस्य प्रमाणत्वाङ्गीकारात् सन्निकर्षरूपव्यापारविशिष्टं करणमेव तदभिप्रेतमित्यनुमानं लघुक्लेशम्। इदञ्च वाचस्पतिवचः तात्पर्यटीकायाम् "इन्द्रियमेव तत्तत्सन्निकर्षादिना साक्षात्प्रमा-हेतुः"[3] इति करणस्य व्यापारवत्त्वरूपमेव समर्थयति। अपि च भाषापरिच्छेदस्य मङ्गलप्रकरणे उक्तमिदं – "विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः"[4] इति तादृशप्रसिद्धिं स्खलयति। वस्तुतो यत् प्रसिद्धं तस्य पूर्णतो विपरीतम् ईरितं तर्कसङ्ग्रहस्य नीलकण्ठीटीकायाम् "असाधारणं कारणं करणम्" इत्यस्य व्याख्यायाम् – "व्यापारवत्त्वे सति इत्यपि वक्तव्यम्। अतश्चक्षुस्संयोगादौ नातिव्याप्तिः। श्रोत्रमनस्संयोगः, शब्दो वा व्यापारः सम्भवत्येवेति न श्रोत्रेन्द्रिये करणलक्षणाव्याप्तिरिति वदन्ति। यद्विलम्बात् प्रकृतकार्यानुत्पादः तत्कारणत्वस्य असाधारणत्वात्मकतया कालादिषु तादृश-कारणत्वाभावान्नातिव्याप्तिः। व्यापारत्वेनाभि-मतेन्द्रियसंयोगादिकम् एव करणम्। अत एव मणिकारैरप्युक्तं *तच्च लिङ्गपरामर्शः* इति ग्रन्थेनेति तु नव्याः।"[5] इति।

"व्यापारवत् कारणं करणमि"त्यस्य व्यापारविशिष्टकारणस्य करणत्वमित्यर्थत्वे घटप्रत्यक्षे घटस्यापि करणता, तत्र घटचक्षुस्संयोगस्य व्यापारत्वात्, तस्य च उभयनिष्ठत्वात्। एवं घटस्य तादृशसंयोगवत्त्वाद् घटेनापि करणेन भाव्यमिति चेन्न, व्यापारसम्बन्धावच्छिन्न-कारणताश्रयमेव करणत्वेनात्र विवक्षितम्,

1 Shivachandra Sarvabhauma. Kiranvali, page - 7
2 Nyayavarttika, page – 14, ed. Tarkatirtha, Amarendramohan, Nyayatarkatirtha, Taranath, 2nd edition 1985, Munshiram Manoharlal Publishers Pvt. Ltd., Calcutta
3 Nyayavarttika-tatparya-tika, page – 17, ed. Tarkatirtha, Amarendramohan, Nyayatarkatirtha, Taranath, 2nd edition 1985, Munshiram Manoharlal Publishers Pvt. Ltd., Calcutta
4 Bhashaparichheda, Page – 8, Visvanatha Nyayapanchanana; Ed. Bhattachacharya Pachanana, 2016 (First published 1970), Mahabodhi Book Agency, Kolkata
5 Nilakantha-Prakashika, Commentry of Tarkasmgraha-Dipika, page – 239, Nilakantha-Shastri; Ed. Vangiya, Sharma, Satkari, 4th edition 2003, Chowkhamba Sanskrita Bhavan, Varanasi

ISSN : 2583-2271
Vol. - I, No. 1: 2021

तादृशकारणताश्रयं च चक्षुरिन्द्रियमेव भवति, घटस्तु विषयतासम्बन्धावच्छिन्नकारणताश्रयो भवतीति न स करणम्। अयञ्च परिष्कारो विहितः कारकचक्रे, तर्कसङ्ग्रहदीपिकाया नृसिंहप्रकाशिकाटीकायाञ्च। ननु कोऽत्र व्याख्यानप्रभावः? प्रज्ञावतः सुबोधम् एतत्। कथम् अन्यथा व्याख्यात्रा अवगम्य व्यलेखि, न च मन्दमतीनां गतिरचनाय इति वाच्यम्, यतो **यस्य नास्ति स्वयंप्रज्ञा शास्त्रं तस्य करोति किम्** इति चेदुच्यते, सत्यम्, गम्यं हि तत् मेधाविना, न तु कोमलधिया, न च कश्चन आ जन्मनः कृतविद्यः। पर-नय-पराकरण-पराणां विपक्षीयाणां कर्कश-विचार-करवालैर्यथा न मुकुलमतीनां वादगतिः खण्डिता भवति, यथा च विद्यार्थिबुद्धिः निपुणसरणिर्भवति तद् उद्दिश्यैव ईदृशं सूक्ष्मं विश्लेषणम्। यथा तत्र भवति संशयः व्यापारवन्मात्रस्यैव किं करणत्वमिति? यद्यपि सर्वेषु कारणेषु एव कारणता अस्ति तथापि भिन्नसम्बन्धेन अस्ति, यत्र च सा कारणता व्यापारसम्बन्धेन तदेव करणमिति लक्षणस्य तात्पर्यव्याख्यानम्, अन्यथाव्याख्यानखण्डनम्, शिष्यबुद्धिवर्धनं च इति कर्मत्रयं भवति सम्पादितम्। वस्तुतो व्यापारवत एव करणत्वे तु कर्तुरपि करणतापत्त्या चैत्रश्चैत्रेण पचति, काष्ठं चैत्रेण पचतीत्यादयः प्रयोगाः प्राप्नुयुः। अतो व्यापारे कर्तृव्यापाराधीनत्वं निवेशनीयम्। न च कर्तुश्चेष्टादिरूपव्यापारस्य तदीयकृत्यादिरूप-व्यापाराधीनतया तद्विशेषणदानेऽपि कर्तुः करणत्वं दुर्वारमेव इति वाच्यम्, स्वभिन्नत्वेन कर्तुर्विशेषणीयत्वात्। अन्यथा कुठारादिकरण-कच्छिदादौ दात्रादेरपि स्वरूपयोग्यतया करणत्वापत्तेः। इदञ्च व्युत्पत्तिवादग्रन्थे गदाधरभट्टाचार्येण विश्लेषितम्। व्युत्पत्तिवाद-ग्रन्थस्य तु प्रकरणग्रन्थत्वात् तस्याप्यत्र ग्रहणार्हता।

किञ्च, फलायोगव्यवच्छिन्नस्य कारणस्य करणत्वे का तावद् हानिः यदनुरोधेन तन्मतवर्जनेन व्यापारवत् करणमित्येव ग्राह्यम् इति विचार्यम्। मणिग्रन्थे च सन्निकर्षवादे "विशिष्टप्रत्यक्षे च विशेषणज्ञानं न करणं व्यापाराभावात्"[6] इत्युल्लेखात् फलाव्यवहित-पूर्ववर्तिकारणस्य कथं तावत् न करणत्वमित्यस्य हेतुतया व्यापाराभाव एव प्राप्यते। इदं तु तत्त्वम्, किञ्चित्कार्योत्पत्तौ प्रत्येकं कारणमेव किञ्चिद्-व्यापारविशिष्टं भवति, करणं च व्यापाररहितम् अपि कार्योत्पादकं भवतीति न सम्भवति इत्यत एव फलायोगव्यवच्छिन्नकारणस्य व्यापारवत्त्वा-भावात् करणत्वम् अनङ्गीकृत्य तद्विशिष्टस्य एव व्यापारवत्त्वात् करणत्वम् अङ्गीक्रियते। ननु सर्वं कारणं किञ्चिद्-व्यापारविशिष्टम् इति चेत् व्यापारेणापि व्यापारवता एव भाव्यम्, तस्यापि कारणत्वादिति चेन्न, अनवस्थापत्तेः। मणिकृतामपि अत्रैव स्वरसः। यद्यपि तेन अनुमानग्रन्थस्य आदावेव "तत्र व्याप्तिविशिष्ट-पक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिस्तत्करणम-नुमानं तच्च लिङ्गपरामर्शो न तु परामृष्यमाणं लिङ्गमिति वक्ष्यते"[7] इत्यत्र परामर्शस्यैव करणत्वाभिधानात् व्यापारस्यैव करणत्ववादि-त्वमिव तस्य प्रतीयते तथापि परं तेन स्वयम् – "यत्तु व्यापाराभावान्न परामर्शः करणमिति तथैव किन्तु व्याप्तिज्ञानं करणं परामर्शो व्यापारः। न च परामर्शस्य संस्कारो व्यापारः परामर्शस्य च चरमकारणत्वेन संस्कारोत्पाद-नसमये अनुमित्युत्पादनात्"[8] इत्यनेन व्यापारवत एव करणत्वं समर्थितम्। अत एव मथुरानाथतर्कवागीशमहोदयेन तदीयटीकायां स्थलद्वयस्थ-विरोध-सङ्गत्यर्थं मणिग्रन्थारम्भे करणत्वेन उक्तस्य परामर्शस्य व्याप्तिज्ञानम् इत्यर्थः कृतः।

इतश्च अपरं मतम् उद्भावितं भट्टजयन्तेन। फलायोगव्यवच्छिन्नं कारणं करणमिति

6 Kamakhyanatha Tarkavagisha. Tattvachintamani, Pratyakshakhanda, page - 552
7 Kamakhyanatha Tarkavagisha. Tattvachintamani, Anumanakhanda, page - 2
8 Srijivananda Vidyasagar. Tattvachintamani, Anumanakhanda, page - 45

ISSN : 2583-2271
Vol. - I, No. 1: 2021

मतानुसारमेव करणं न किञ्चिद् एकं कारकम्, किन्तु कारकसामग्री एव इति प्रतिपादितम्। कश्चात्र तदीयविशेष इति चेत्, उक्तकरणलक्षणस्य हि सर्वेषु एव कारकेषु भवति सङ्गमनमिति समेषां कारकाणां करणतापत्तिर्भवति, यतः प्रकृतकार्यस्य कारणेषु एकतरस्य अनुपस्थितौ एव फलायोगो भवति, तदुपस्थितिमात्रमेव च स फलायोगो भवति व्यवच्छिन्नः। अतः सर्वाणि कारणानि करणानि भवेयुरिति ईदृशशङ्कावकाशः। तत्र च वस्तुत एकतरस्य कारणस्य अभावात् सामग्र्यभावः, सामग्र्यभावे च कार्याभावः, यत्र च एकतरकारणोपस्थितौ कार्योत्पत्तिस्तत्रापि तत्कारणसमवधानात् कारणसामग्री भवति, सत्यां च सामग्र्याम् एव कार्यम् उत्पद्यते इति सामग्र्या एव फलायोगव्यवच्छेदकत्वात् तस्या एव करणत्वं समुचितमिति भूरिविचारैः शङ्काध्वंसपुरस्सरं संसाधितम्। यथोक्तं तेन – "अविरलजलधरधाराप्रबन्धबद्धान्धकारनिवहे बहुल-निशीथे सहसैव स्फुरता विद्युल्लतालोकेन कामिनीज्ञानमादधानेन तज्जन्मनि सातिशय-त्वमवाप्यते। एवमितरकारककदम्बसन्निधाने सत्यपि सीमन्तिनीमन्तरेण तद्दर्शनं न सम्पद्यते। आगतमात्रायामेव तस्यां भवतीति तदपि कर्मकारकमतिशययोगित्वात् करणं स्यात्, तस्मात् फलोत्पादाविनाभावि-स्वभावत्वमवश्यतया कार्यजनकत्वमतिशयः। स च सामग्र्यामन्तर्गतस्य न कस्यचिदेकस्य कारकस्य कथयितुं पार्यते। सामग्र्यास्तु सोऽतिशयः सुवचः। सन्निहिता चेत् सामग्री, सम्पन्नमेव फलमिति सैवातिशयवती।"[9] इति। भट्टजयन्तस्य इदं तु मतं न समादृतम्।

**उपसंहारः**

अन्तत उच्यते, व्यापारवतो व्यापारस्यैव वा करणत्वम् आधिक्येन स्वीकृतम्। तत्र च, यैस्तु फलायोग-व्यवच्छिन्नस्य करणत्वम् अङ्गीकृतं तैरपि व्यापारवाचकपदादुत्तरं तु न तृतीया प्रयुज्यते, किन्तु तद्-व्यापारवद्-वाचकपदादुत्तरम् एव, अत एतद् वक्तुं शक्यते यत् तेषां नये व्यापार एव मुख्यं करणम्, व्यापारवत् च गौणं करणम्, तत्र व्यापारवति धर्मिणि धर्मारोपात् करणत्वमारोप्यते, तद्वाचकात् च पदाद् अतः तृतीया तस्यापि गौणतया करणत्वात्। व्यापारवतः करणत्ववादिनां नये तु एतद्-दृष्ट्या लाघवम्। एतच्च व्याख्यासु करणवाचक-पद-प्रयोगदर्शनत एव भवति सुगममिति शिवम्।

[9] Amit Bhattacharya. Nyayamanjari, page - 78

ISSN : 2583-2271
Vol. - I, No. 1: 2021

## सहायकग्रन्थाः


- Shastri, Dhundhiraja. *Shabdasaktiprakashika.* Banaras: Jai Krishnadas Haridas Gupta, 1934
- Bhattacharya, Amit. *Nyamanjari.* Kolkata: Sanskrit Book Depot, 2006
- Jawaji, Panduranga. *Tarkasangraha.* Bombay: Nirnaya Sagar Press, 1933
- Nyaya-Tarkatirtha, Taranatha. *Nyayadarshanam.* Calcuta: Munshiram Manoharlal Publishers Pvt. Ltd, 1985 (1936-44)
- Vangiya Satkarisharma. *Tarkasangraha.* Varanasi: Chaukhambha Sanskrit Sansthan, 2003
- Tarkavagish, Kamakhyanath. *Tattvachintamani.* Calcuta: The Asiatic Society, 1892
- Sarvabhauma, Shivachandra, *Kiranavali.* Calcuta: The Asiatic Society, 1911
- Mishra, Umesha.*Vyutpattivada*. Allahabad: Dikshit Press, 1953 (1927)
- Paramalaghumanjusha
- Yogindrananda, Swamin. *Chitsukhi.* Kashi: Udasina-Sanskrita-Vidyalaya, 1985
- Vaiyakarana-Bhushana-Sara
- Tarkabhasha
- Tarkavagisha, Phanibhushan. *Nyaya Darshana.* Kolkata: Bangiya Sahitya Parishat, (1346-Bangabda)